श्री काळिका स्तोत्रं

श्री काळिका स्तोत्रं

श्रीदेव्युवाच |
स्वामिन् सर्वजगन्नाथ प्रणतार्तिविनाशन |
काळिकायाः महास्तोत्रं ब्रूहि भक्तेष्टदायकं || 1 ||

श्रीदक्षिणामूर्तिरुवाच |
एवं काळीं महादेवीं संपूज्य नरपुंगवः |
स्तोत्रं जपेदिदं नित्यं काळिकाया महेश्वरि || 2 ||

ॐ क्रीं |
जय त्वं काळिके देवि जय मातर्महेश्वरि |
जय दिव्ये महालक्ष्मि महाकाळि नमोऽस्तु ते || 3 ||

मुक्तकेशि नमस्तेऽस्तु नमस्तुभ्यं चतुर्भुजे |
वीरकाळि नमस्तुभ्यं मृत्युकाळि नमो नमः || 4 ||

नमः कराळवदने नमस्ते घोररूपिणि |
भद्रकाळि नमस्तुभ्यं महाकालप्रिये नमः || 5 ||

जय त्वं सर्वविद्यानामधीश्वरि शिवप्रिये |
वागीश्वरि महादेवि नमस्तुभ्यं दिगंबरे || 6 ||

नीलमेघप्रतीकाशे नीलांबरविराजिते |
आदिमध्यांतरहिते नमस्ते गणकाळिके || 7 ||

सर्वसंपत्प्रदे नित्यं सर्वोपद्रवनाशिनि |
महामाये महाकृष्णे भक्तशत्रुविनाशिनि || 8 ||

जगन्मातर्जगद्रूपे विरूपाक्षि नमोऽस्तु ते |
सिंहारूढे नमस्तुभ्यं गजारूढे नमो नमः || 9 ||

नमो भद्रांगि रक्ताक्षि महादेवस्वरूपिणि |
निरीश्वरि निराधारे निरालंबे नमो नमः || 10 ||

निर्गुणे सगुणे तुभ्यं नमस्तेऽस्तु सरस्वति |
नीलकेशि नमस्तुभ्यं व्योमकेशि नमोऽस्तु ते || 11 ||

नमस्ते पार्वतीरूपे नम उत्तरकाळिके |
नमस्ते चंडयोगेशि चंडास्ये चंडनायिके || 12 ||

जय त्वं चंडिके भद्रे चामुंडे त्वां नमाम्यहं |
नमस्तुभ्यं महाकाये नमस्ते मातृसंस्तुते || 13 ||

नमस्ते सिद्धसंस्तुत्ये हरिरुद्रादिपूजिते |
काळिके त्वां नमस्यामि तवोक्तं गिरिसंभवे || 14 ||

फलश्रुतिः –
य एतन्नित्यमेकाग्रः प्रजपेन्मानवोत्तमः |
स मुच्यते महापापैर्जन्मकोटिसमुद्भवैः || 15 ||

व्याचष्टे सर्वशास्त्राणि विवादे जयमाप्नुयात् |
मूकोऽपि ब्रह्मसदृशो विद्यया भवति ध्रुवं || 16 ||

एकेन श्रवणेनैव ग्रहेद्वेदचतुष्टयं |
महाकविर्भवेन्मंत्री लभते महतीं श्रियं || 17 ||

जगत्त्रयं वशीकुर्यात् महासौंदर्यवान् भवेत् |
अष्टैश्वर्याण्यवाप्नोति पुत्रान् पौत्राननुत्तमान् |
देवीसामीप्यमाप्नोति अंते नात्र विचारणा || 18 ||

इति श्रीत्रिपुरसुंदरीतंत्रे श्री काळिका स्तोत्रं |